International Journal of Sanskrit Research 2017; 3(4): 289-290

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 289-290
© 2017
www.anantaajournal.com
Received: 26-05-2017
Accepted: 30-06-2017

**डक्टर अरुणकुमारपोड़ेलः**
श्यामसुन्दरकालेजः (संस्कृतविभागः),
पूर्व वर्धमान, पश्चिमवङ्गः, भारत

Correspondence
**डक्टर अरुणकुमारपोड़ेलः**
श्यामसुन्दरकालेजः (संस्कृतविभागः),
पूर्व वर्धमान, पश्चिमवङ्गः, भारत

# कालिदासकृतिषु साहित्यभावना

**डक्टर अरुणकुमारपोड़ेलः**

**सारांश**
प्राच्यपाश्चात्यसाहित्यनिर्मातृसमाज सश्रद्धं स्मर्यमाणेषु कविकुलज्योतिष्केषु कालिदासो स्वीयते। महाकविधुरन्धरो अयं कविताकल्पलतावितानपरिशोधिते काव्यमार्गे स्वकीय महिम्ना तथा स्वीयप्रतिभायाः प्रत्यग्ररुपश्रिया किमपि अपूर्वं सहृदय हृदयसंवोध्यं वस्तु आदधानो अद्यापि जागतीतले अस्मिन् देदिप्यतेतराम्। महाकविरयं जन्मना कं देशं कञ्च समयमलंकृतवान् कौ च तादृशौ पुण्यभाजौ पितरौ ययोरयं मूर्तिमानानन्देत्सव आसीदित्यादिविषये दुर्भेद्यं तिमिरं भित्वा नास्माकं दृष्टिः प्रसरति। सत्यपि वैमत्ये भारतेतिहासस्य सुवर्णसमयतया प्रथिते गुप्तसाम्राज्यकाले कवेरस्य प्रार्दुभावः सम्भाव्यते अस्माभिः। कविनानेन रघुवंशकुमारसम्भव मेघदूताख्यानि त्रीणि काव्याणि, ऋतुसंहारमिति एकं खण्डकाव्यम्, मालविगाग्निमित्र – विक्रमोर्वशीया अभिज्ञानशाकुन्तलाख्यानि त्रीणि नाटकानि विरचितानि इत्यत्र नास्ति शङ्कापङ्कलेशो अपि। अन्ये अपि वहवः प्रवन्धाः कालिदास – विरचितया प्रथमानाः सहृदयहृदयानि समावर्जयन्ति इत्यपि नाविदितं विदुषाम्। महाकविरयं तथाविधो यस्य एको अपि प्रवन्धः प्रवन्धशतायते, एको अपि श्लोकः श्लोकसहस्रायते, एकमपि च नाटकं नाटकरत्नायते। किमु वक्तव्यम्, एकमपि काव्यं काव्यजगति समुज्ज्वलं सूर्यवत् समुदीप्तं सर्वासु दिक्षु रसिकजनहृदयेषु विमलामानन्दमातनोति।

**प्रस्तावना**
सर्वास्वेव कालिदासकृतिषु विलसति सुषमा। मधुमासे यथा कोकिलाः कानने-कानने सर्वेषामेव हृदये अमन्दमानन्दं संजनयन्ति तथैव महाकवेः कालिदासस्य काव्यकोकिला रसिकजनानामानने आनने विहरन्तो मनोज्ञपूर्वम् मोदं संसूचयन्ति।
एवंविधप्रसिद्धिं गतानां कालिदासीयानां काव्यानां तथा नाटकानां चरमं तथा परमं कारणं तु इदमेव यत् रसादीनां परिवेशनमेवं सुसमञ्जसताया प्राञ्जलतया च उपस्थापितं यत् खलु अन्यत्र दुरापमेव। न केवलमेतावदेव, ऐहिकसाहित्यभावनापि महाकवेरस्य कृतिषु परं प्रकाशिता या खलु तस्य प्रत्यक्षचिन्ताप्रसूताः।
महाकविः कालिदासो हि भारतवर्षस्य जातीयः कविः भारवासिनाञ्च चिरन्तया आशाया आकाङ्कायाश्च प्रतीकः। कालिदासः राजतन्त्रस्य पक्षपाती आसीत्। स वैदिक वाङ्मयेषु रामायण महाभारतादि ग्रन्थेषु राजधर्म विशारदानां कौटिल्यादीनामर्थशास्त्रदिषु च प्रदर्शितव्यवस्थाया अनुवर्तनं चकार। वौद्धजैनादि वैदिकोत्तरधर्मप्रवक्तृणां प्रचारितं दुःकवादं स न अङ्गीचकार इति तस्य काव्यदीनामनुशीलनेनैव सम्यक् प्रतीयते। भारतभूमेः नदनदीपर्वततादीनां तथा विभिन्नप्रदेशवासिनां नरनारीणां यत् सजीवमालेख्यं तेन आलिखितं तत् हितस्य भारतप्रीतेः समुज्ज्वलं निदर्शनम्। स्वरूपविषये कालिदासमतं तावदवगम्यते –

**"सो अहमाजन्मशुद्धानामाफलोदयकर्मणाम्।**
**आसमुद्रक्षितीशानामानाकरथवर्त्मणाम्॥**
**यथाविधिहुताग्निनां यथाकामार्चितार्थिनाम्।**
**यथापराधदण्डाणां यथाकालप्रवोधिनाम्॥**
**त्यागाय सम्भूतार्थाणां सत्याय मितभाषिणाम्।**
**यशसे विजिगीषुणा प्रजायै गृहमेधिनाम्॥**
**शैशवेअभ्यस्तविद्यानां यौवने विषयैषिणाम्।**
**वार्धक्य मुनिवृत्तिनां योगेनान्ते तनुत्यजाम्॥"**
रघुणामम्वयं वक्ष्ये -(रघु. १/५-८-९)

इत्युक्तिपरम्परातः। अत्र रघुणां यच्चरित्रमालिखितं तद्धि सार्वकालिकप्राशासकानामेव चरित्रं भवितुमुचितम्। राजादर्श विषये दिलीपसम्वनेधन यत् खलु कविना समुल्लिखितं तदपि इह उल्लेख्यम् –

"रेखामात्रामपि क्षुन्नादा मनोर्वर्त्मनः परम्।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः॥ (रघु. १/१७)

रघुवंशीया राजान एव नन्दनीयचरित्रः प्रजारञ्जनत्त्पराः लोकोपकारकाः जितेन्द्रियाश्च।

महाकविरसौ स्वकृतिषु स्वदेशस्य यानि नगराणि समुल्लिखितवान् तानि समृद्धिशालिन्य। भारतीय संस्कृतेः परिचायकानि। तस्य उज्जयिनी – १७, विदिशा – १८, मथुरा – १९, पुष्पपुरा – २०, योध्यादयो – २१, नगर्व्यः धर्मार्थकामपुरुषार्थैः प्रपुरिताः।

महाकविना कालिदासेन स्वकृतिषु उल्लिखितानि ऋषि-मुणीनाम्-२२, आश्रमतीर्थ-२३, मन्दिरादिनी प्राचीनभारतस्य आध्यात्मिकोत्कर्ष पूर्णाया उपलब्धेः किर्तिमयीं कथां कथयन्ति।

वैचित्र्यञ्च वर्णयित्वा महाकविरसौ सर्वत्रैव साहित्यस्य एकां समन्वितां समृद्धिपूर्णाञ्च रमणीयतामेव अस्मान् दर्शयति। महाकवेः कालिदासस्य कृतिषु साहित्यभावना सुतरां महत्वपूर्णेति।

**ग्रन्थपञ्जी : -**


1. Work of Kalidasa – R.P.Dvivedi (Chowkhamba Publications, Venaras)
2. रामायणम्, गीताप्रेस, गोरक्षपुरम्, उत्तरप्रदेशः।
3. महाभारतम् – तदेव।
4. रघुवंशम् – राजेन्द्रनाथविद्याभूषणकृतम्।
5. रघुवंशम् – गुरुनाथविद्यानिधिकृतम्।
6. History of Sanskrit Literature – Bimanbihari Bhattacharyya.
7. History of Indian Literature – Winter Hitz.